"उद्वेगो गुरुता देहे रक्तस्रावो भवेद्बहु ।
नाभेरधो भवेत् शूलं चाङ्कुर: स तु बाधक: ॥
ऋतुहीना चतुर्म्मासं त्रिमासं वा भवेद्यदि ।
कृशाङ्गी करपादे च ज्वाला चाङ्कुरयोगत: ॥"
इति चाङ्कुरस्य ॥
"सशूला च सगर्भा च शुष्कदेहाल्परक्तिका ।
जलकुमारस्य दोषेण जायते फलहीनता ॥
या कृशाङ्गी भवेत् स्थूला बहुकालऋतुस्तथा ।
गुरुस्तनी स्वल्परक्ता जलकुमारस्य दूषणात् ॥"
इति जलकुमारस्य ॥
इति वैद्यकम् ॥ बाधाजनके, त्रि ॥ (यथा, मार्कण्डेये । ३४ । १६ ।
"धर्म्मो धर्म्मानुबन्धार्थो धर्म्मो नात्मार्थ-बाधक: ॥")

बा(वा)धनं, क्ली, (बाध + ल्युट् ।) पीड़ा । इति शब्दरत्नावली ॥ प्रतिबन्धकश्च ॥ (बाधते इति । बाध + ल्यु: । पीड़ादातरि प्रतिबन्धके च त्रि । यथा, हरिवंशे । ६५ । ५३ ।
"श्रूयतां कथयिष्यामि यत्रोभौ शत्रुबाधनौ ॥")

बा(वा)धा, स्त्री,(बाध + टाप् ।) पीड़ा । इत्यमर: । १ । ६ । ३ ॥ (यथा, मार्कण्डेये । २२ । ३ ।
"दुर्वृत्ता: सन्ति शतशो दानवा: पापयोनय: ।
तेभ्यो न स्यात् यथा बाधा मुनीनां त्वं तथा कुरु ॥")
निषेध: । इति हेमचन्द्र: ॥

बा(वा)धित:, त्रि, (बाध + क्त ।) बाधायुक्त: । निवर्त्त: । यथा । सकृद्गतविप्रतिषेधेन यद्बाधितं तद्बाधितमेव । इति मुग्धबोधटीकायां दुर्गादास: ॥

बाधिर्य्यं, क्ली, (बधिरस्य भाव: । बधिर + ष्यञ् ।) बधिरस्य भाव: । कर्णरोगविशेष: । तस्य निदानम् । यथा,—
"यदा शब्दवहं वायु: स्रोत आवृत्य तिष्ठति ।
शुद्ध: श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते ॥"
इति माधवकर: ॥
अस्यौषधं यथा,—
"शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शुक्तं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयो: ।
क्रमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥"
अपि च ।
"प्रस्थे द्वे गण्डमालानां क्वाथयेद्द्रोणमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ।
काञ्जिकस्याढकं दत्त्वा पिष्टान्येतानि दापयेत् ॥
पुनर्नवा गोक्षुरकं सैन्धवं त्र्यूषणं वचा ।
सरलं सुरदारुञ्च वृहती कण्टकारिका ॥
नस्यपानाद्धरत्येव कर्णशूलं सुदुस्तरम् ।
बाधिर्य्यं सर्व्वरोगांश्च अभ्यङ्गाच्च महेश्वर ! ॥"
इति गारुड़े १९८ अध्याय: ॥
(असम्प्राप्तिकारणमस्य यथा,—
"स एव शब्दाभिवहा यदा शिरा:
कफानुयातो व्यनुसृत्य तिष्ठति ।
सदा नरस्याप्रतिकारसेविनो
भवेत्तु बाधिर्य्यमसंशयं खलु ॥"
इत्युत्तरतन्त्रे विंशतितमेऽध्याये सुश्रुतेनोक्तम् ॥
अस्य चिकित्सा यथा,—
"सामान्यतो विशेषेण बाधिर्य्ये पूरणं शृणु ।
गवां मूत्रेण विल्वानि पिष्ट्वा तैलं विपाचयेत् ॥
सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणम् ।
सितामधुकविम्बीभि: सिद्धं चाजे पयस्यथ ॥
सिद्धं वा विल्वनि:क्वाथे शीतीभूतं तदुद्धृतम् ।
पुन: पचेद्‌शचीरं सितामधुकचन्दनै: ॥
विल्वाम्बु गाढ़ं तत्तैलं बाधिर्य्ये कर्णपूरणम् ।
वक्ष्यते य: प्रतिश्याये विधि: सोऽप्यत्र पूजित: ।
वातव्याधिषु यश्चोक्तो विधि: स च हितो भवेत् ॥"
इति च तत्रैकविंशतितमेऽध्याये तेनैवोक्तम् ॥)

बाध्यं, त्रि, (बाध + ण्यत् ।) बाधनीयम् । बाधितव्यम् । निवर्त्त्यम् । यथा । साङ्गचितालिङ्गदर्शनात् प्रकरणमिदं बाध्यम् । इति ब्रह्मसूत्रस्य समञ्जसाहत्ति: ॥ (यथा, मार्कण्डेये । ६६ । ४० ।
"नाहं स्वारोचिषस्तुल्य: स्त्रीबाध्यो वा जलेचरि ! ॥")

बाध्यता, स्त्री, (बाध्यस्य भाव: । बाध्य + तल् ।) बाध्यत्वम् । बाध्यस्य भाव: इत्यर्थे तप्रत्ययनिष्पन्नोऽयं शब्द: ॥

बान्धकिनेय:, त्रि, (बन्धक्या अपत्यं पुमान् । बन्धकी + "कल्याण्यादीनामिनङ् ।" ४।१।१२६। इति ढक् इनङ् च ।) असतीसुत: । इत्यमर: । २ । ६ । २६ ॥

बान्धव:, पुं, (बन्धुरेव । बन्धु + "प्रज्ञादिभ्यश्च ।" ५। ४ । ३८ । इति स्वार्थे अण् ।) ज्ञाति: । इत्यमर: ।२।६।३४॥ सुहृत् । इति मेदिनी । वे, ४५ ॥ (यथा, मनु: । ५ । ७० ।
"नात्रिवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया ॥")
अस्य विवरणं बन्धुशब्दे द्रष्टव्यम् ॥

बाभ्रवी, स्त्री, (बभ्रोर्म्महादेवस्य पत्नी । बभ्रु + अण् + ङीप् ।) दुर्गा । इति त्रिकाण्डशेष: ॥ (यथा, मार्कण्डेये । ९१ । २१ ।
"मेधे सरस्वति वरे भूति बाभ्रवि तामसि ! ॥")

बारकीर:, पुं, द्वारग्राही । वाड़व: । यूका । वेणिवेधिनी । नीराजितहय: । इति मेदिनी ।रे, २८६॥

बार्ब्बटीर:, पुं, चपु । आम्रास्थि । अङ्कुर: । गणिकासुत: । इति हेमचन्द्र: ॥

बार्हस्पतं, त्रि, वृहस्पतिसम्बन्धि । वृहस्पतेरिदं इत्यर्थे (अण्) णप्रत्ययेन निष्पन्नम् ॥

बार्हस्पत्य:, पुं, (बार्हस्पत्यं वृहस्पतिप्रोक्तं शास्त्रं अधीयमानत्वेनास्त्यस्येति । अर्श आदित्वादच् ।) नास्तिक: । यथा, हेमचन्द्र: ।
"स्याद्वादवाद्यार्हत: स्याच्छून्यवादी तु सौगत: ।
नैयायिकस्त्वक्षपादो योग: सांख्यस्तु कापिल: ॥
वैशेषिक: स्यादौलूक्यो बार्हस्पत्यस्तु नास्तिक: ।
चार्व्वाको लौकायतिकश्चेते षड़पि तार्किका: ॥"
(वृहस्पतिना प्रोक्तमिति । वृहस्पति + ण्य: ।) नीतिशास्त्रे, क्ली । इति केचित् ॥ वृहस्पतेरिदमिति वा । वृहस्पति + "दित्यदित्यादित्यपत्युत्तरपदाण्ण्य: ।" ४ । १ । ८५ । इति ण्य: ।) वृहस्पतिसम्बन्धिनि, त्रि ॥

बालं, क्ली, पुं, (बलतीति । बल + ण: ।) गन्धद्रव्यविशेष: । बाला इति ख्यातम् । इति मेदिनी ॥ तत्पर्य्याय: । ह्रीवेरम् २ बर्हिष्ठम् ३ उदीच्यम् ४ केशनामकम् ५ अम्बुनामकम् ६ । इत्यमर: । २ । ४ । १२२ ॥ ह्रिवेरम् ७ बर्हिष्ठम् ८ । इति भरत: ॥ बालकम् ९ बारिदम् १० इति शब्दरत्नावली ॥ वरम् ११ ह्रीवेरकम् १२ केश्यम् १३ वज्रम् १४ पिङ्गम् १५ ललनाप्रियम् १६ कुन्तलोशीरम् १७ कचामोदम् १८ । अस्य गुणा: । शीतलत्वम् । तिक्तत्वम् । पित्तशान्तितृष्णाज्वरकुष्ठातिसारश्वासव्रणनाशित्वम् । केशहितत्वञ्च । इति राजनिर्घण्ट: ॥ अपि च ।
"बाला वाट्यालिका वाट्या सैव वाट्यालिकापि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥
ततोऽन्यातिबला ऋष्यप्रोक्ता कङ्कतिका सह ।
गाङ्गेरुकी नागबला झषा ह्रस्वा गवेधुका ॥
अस्य गुणा: ।
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ॥
बालाचतुष्टयविशेषगुणा: ।
बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम् ।
मूत्रातिसारं हरति दृष्टमेतन्न संशय: ॥
हरेन्महाबला कृच्छ्रं भवेद्वातानुलोमनी ।
हन्यादतिबला मेहं पयसा सितया सह ॥"
इति भावप्रकाश: ॥

बाल:, त्रि, (बलतीति । बल प्राणने + "ज्वलितिकसन्तेभ्यो ण: ।" ३ । १ । १४० । इति ण: ।) मूर्ख: ॥ (यथा, मनु: । २ । १५३ ।
"अज्ञो भवति वै बाल: पिता भवति मन्त्रद: ।
अज्ञं हि बालमित्याहु: पितेत्येव तु मन्त्रदम् ॥"
"वैशब्दोऽवधारणे अज्ञ एव बालो भवति नत्वल्पवया: ।" इति तट्टीकायां कुल्लूकभट्ट: ॥) अर्भक: । इति मेदिनी । ले, ४० ॥ द्वितीयस्य पर्य्याय: । माणवक: २ । इत्यमर: ।२।६।४२॥ बालक: ३ माणव: ४ किशोर: ५ बटु: ६ सुधिन्धय: ७ बटुक: ८ किशोरक: ९ । इति शब्दरत्नावली ॥ पाक: १० गर्भ: ११ शिशुक: १२ पृथुक: १३ शिशु: १४ शाव: १५ अर्भ: १६ डिम्भक: १७ डिम्ब: १८ । इति राजनिर्घण्ट: ॥ स तु षोड़शवर्षपर्य्यन्त: प्रथमवयस्क: । यथा,—
"आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्ध: स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवते: परम् ॥"
इति स्मृति: । इति भरत: ॥
तस्य रक्षका: सर्व्वदेवता: । यथा,—
"अनाथबालवृद्धानां रक्षका: सर्व्वदेवता: ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्याय: ॥
अथ बालस्य परिचर्य्याविधि: ।
"बालमङ्के सुखं दध्यान्न चैनं तर्ज्जयेत् क्वचित् ।